*Belles-Lettre 2023, Vol. 1, pp. 99-103*

# जीवनसंस्कृताय संस्कारः

विमान अधिकारी

**प्रस्तावना:**

सम् उपसर्गपूर्वकं कृ धातोः घञ् प्रत्यये कृते सति संस्कारशब्दोऽयं निष्पद्यते। यया क्रियया सम्पादनेन मनुष्यः शुद्धो भूयते स एव संस्कारः। अतः शवरस्वामिना उक्तम्-

'संस्कारो नाम भवति यस्मिन् जाते पदार्थो भवति योग्यः कस्यचिदर्थस्य'।[१]

संस्कारोऽयम् एका क्रिया, यः किमपि वस्तु व्यक्तिः वा यथायोग्यं करोति। संस्काररहितं वस्तु व्यक्तिः वा कार्यानुपयोगी भवति। संस्कारेण तेषां कर्मणि योग्यता जायते। आचार्यशंकरमतानुसारं संस्कारेण दोषापनयनं तथा गुणाधानं भवति।

' संस्कारो हि नाम गुणाधानेन वा स्याद् दोषोपनयनेन वा' ।[२]

पितुः वीजजनितं तथा मातुः गर्भजनितं शरीरमिदं पापसम्भूतम्, यतो हि संस्कारेण सः पवित्र भूयते। महामतिमनुमतानुसारं संस्कारेण साधारणशरीरं ब्रह्मप्राप्तेः योग्यतां प्राप्यते।

'स्वाध्यायेन व्रतैर्होमैस्त्रैविद्यैनेज्यया सुतैः।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः'॥[३]

समयभेदे शास्त्रभेदे च संस्कारानां भिन्नता परिलक्षन्ते। पण्डिताः संस्कारानां उपोयोगितामनिवार्यतां च प्रतिपादयन्ति।

**गर्भाधानम्**

षोडशसंस्कारेषु आदिमः संस्कारः गर्भाधानसंस्कारः। गर्भाधानं नाम वीजवपनम्। गर्भशोधनपुरस्सरं गर्भाधानं समाधर्तव्यम्। आचार्यः मनुना गर्भाधानसंस्कारः निषेक इति नाम्नाभिधीयते। मनुः कथयति रात्रिकालः गर्भाधानकर्मनिमित्तं प्रशस्तः, न तु दिवसभागः। ऋतुकालात् अनन्तरं युग्मादिवसे गर्भाधाने पुत्रः, अयुग्मादिवसे च कन्या जायते।

'युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु।
तस्माद् युग्मासु पुत्रार्थी संविशेदार्तवे स्त्रियम्'॥[४]

संस्कारः सर्वदृष्ट्या लोकोपकारको वर्तते। गर्भाधानसंस्कारेण गर्भशुद्धिः जायते गर्भशुद्ध्या च शिशुः निरोगी भवति। अतोऽस्य संस्कारस्य यथा प्राक्काले उपोयोगिता आसीत् तथैवाधुनिकयुगेऽपि वर्तते।

..............................................................................

**शोधच्छात्रः, संस्कृतविभागः, यादवपुर-विश्वविद्यालयः**

**पुंसवनम्**

गर्भधारणादनन्तरं द्वितीयः संस्कारो वर्तते पुंसवनसंस्कारः। गर्भाधानस्य द्वितीये तृतीये मासि वा असौ संस्कारः विधातव्यः। यथादिशन्ति आचार्याः पुंसवनसंस्कारस्य समयं विधाश्च-

‘पुरा स्पन्दत इति मासे द्वितीये तृतीये वा’।[५]

अयमपि संस्कारः आधुनिकयुगे उपयोगितां विदधाति । संस्कारेणानेन गर्भस्थशिशोः मानसिकीस्थितिः प्रबला भवति सम्मोदते च स्थूलोदरा ।

**सीमन्तोन्नयनम्**

संस्कारेषु तृतीयः सीमन्तोन्नयनसंस्कारः। गर्भस्थशिशोः सम्यक् परिपालनार्थमिदं संस्कारानुष्ठीयते। गर्भाधानस्य षष्ठे वा अष्टमेमासे संस्कारोऽयं पालनीयम्।

‘प्रथमेगर्भे मासे षष्ठेऽष्टमे वा’।[६]

अस्य संस्कारस्य सत्तेदानीन्तनयुगे निर्दिष्टे काले नानुभूयते। गर्भे शिशोः रक्षणार्थं स्वादभक्षणानुष्ठानेन अद्यतनसमये संस्कारोऽयं सम्पन्नं भूयते।

**जातकर्मः**

अयं संस्कारः शिशोः जननानन्तरमेवानुष्ठीयते। जन्मनः पश्चात् नाया छेदनात् पूर्वं शिशोः मङ्गलमुद्दिश्य जातकर्मसंस्कारः विधीयन्ते।

‘जातस्य कुमारस्याच्छिन्नायां नाड्यां मेधाजननायुष्ये करोति’।[७]

मेधाजनन- आयुष्यकरण- स्तन्यपानादीनि कर्माणि अस्य संस्कारस्य अन्तर्गतानि भवन्ति। आधुनिके समये चिकित्सापद्धतेराश्रयेण वैद्यानां साहचर्येण च शिशोः जननं कारयन्ति।

**नामकरणम्**

नामरुपात्मकं जगतमिदम्। नामकरणसंस्कारस्य लोके सर्वथापि उपयोगिताऽवर्तिष्ट वर्तते। चेतनायाः विकाशाय दैनन्दिनजीवनस्य व्यवहाराय यत्नशीलः मानवः नामकरणसंस्कारं करोति। नाम्ना व्यक्ति ख्याति प्रशंसां च लभते। असौ संस्कारः दशमे अह्नि सम्पाद्यते। यथोक्तमाचार्येण-

‘दशम्यामुत्थाप्य ब्राह्मणान् भोजयित्वा पिता नामं करोति ।[८]

नामानि नक्षत्रनामानुसारेण, मासनामानुसारेण, देवतायाः नामानुसारेण, लौकिकनामानुसारेण, प्रतिकारात्मकानि च भवन्ति।

**निष्क्रमणम्**

शिशोः जननात् परं चतुर्थे मासे संस्कारोऽयं विधातव्यः। यथादिशन्ति आचार्याः निष्क्रमणसंस्कारस्य समयं विधाश्च-

'चतुर्थे मासि निष्क्रमणिका'।[९]

निष्क्रमणसंस्कारः शिशोः गृहात् वहिर्गमनपूर्वकं सूर्यदर्शनेन सम्पाद्यते। निष्क्रमणसंस्कारस्यापि समाजे यथायोग्य स्थानम् उपयोगिता च वर्तते। अधुना षष्ठीपूजनेन संस्कारोऽयं सम्पन्नं भूयते।

**अन्नप्राशनम्**

शिशोः जन्मतो षष्ठे अष्टमे वा पुत्रस्य कन्यायाः च पञ्चमे सप्तमे मासे वाऽन्नप्राशनं शुभदायकं भवति।

'षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले'।[१०]

इदानीन्तनयुगे विधिवदन्नप्राशनसंस्कारः न क्रीयते। यदा परिवारस्थाः जना इच्छन्ति तदानीमन्नप्राशनं क्रीयते। अधुना अन्नप्राशनसंस्कारः वालकः अन्नपानादीनां यथावत् ग्रहणे समर्थः सञ्जातः इत्येवमर्थं वोधयति।

**चूडाकरणम्**

चूडाकरणम् प्रथमे वर्षे तृतीये वा द्विजातीनां करणीयम्।

'चूडाकर्म द्विजातिनां सर्वेषामेव धर्मतः।
प्रथमेऽव्दे तृतीये वा कर्तव्यं श्रुतिचोदनात्'॥[११]

चूडा शब्दस्यार्थः शिखा। अयं संस्कारः केशकर्तनेन सम्बन्धो वर्तते। केशानां कर्तनं ततः खल्वाटीकृत्य शिरसः शोधनमेव विन्यासः चूडाकरणसंस्कारः। अद्यतनसमये द्विजातीनां उपनयनकाले एवास्यानुष्ठानं भवति।

**उपनयनम्**

अतः परम् उपनयनसंस्कारः। गर्भाष्टमे ब्राह्मणस्य उपनयनं विधातव्यम्। क्षत्रियकुमारस्य एकादशे वर्षे वैश्यपुत्रस्य द्वादशवर्षे उपनयनसंस्कारः विधातव्यम्।

'गर्भाष्टमेऽव्दे कूर्वीत् ब्राह्मणस्योपनयनम्।
गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः'॥[१२]

आधुनिकसमाजे इदं संस्कारः विशेषप्रकारेण व्यवह्रियते। ब्रह्मवर्चसकामः विप्रस्य पञ्चमे वर्षे वलार्थिनः राज्ञः षष्ठे अर्थार्थिनः वैश्यस्य च अष्टमे वर्षे उपनयीत।

'ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे।
राज्ञो वलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे'॥[१३]

परमावधिश्च उपनयनस्य यथाक्रमं षोडश- द्वाविंशति- चतुर्विंशतिश्च भवन्ति।उपनयने वहुनि विधानानि प्रचलितमस्ति। तेषां मध्ये वहुनि कर्माणि आधुनिकसमाजेऽपि भवन्ति।

**समावर्तनम्**

समावर्तनं नाम वेदध्यायनसमापनान्ते गुरूकुलात् स्वगृहे प्रत्यावर्त्तनं। अयं संस्कारः स्नानम् इति

नाम्नाऽपि अभिधीयते। समावर्तनसंस्कारः सर्वथा लोकोपकारको वर्तते। स्नातकः वेदध्यायनं कृत्वा यदि गुरुकूले संतिष्ठते तर्हि अस्य विद्यायाः स्वाधीनदिशा को ग्राह्यः कः त्याज्यः इति जानातु संस्कारोऽयं प्रतिपादितः। आधुनिकयुगेऽपि विश्वविद्यालये विद्यासमापनान्ते समावर्तनं भवति।

**केशान्तः**

केशान्तसंस्कारस्य अपरं नाम गोदानम्। अस्य संस्कारस्य कालप्रसङ्गे आचार्यमनुना उक्तम्- षोडशे वर्षे ब्राह्मणस्य द्वाविंशते वर्षे क्षत्रियस्य वैश्यस्य च चतुर्विंशते वर्षे केशान्तसंस्कारः विधीयते।

‘केशान्तः षोडशे वर्षे ब्रह्मणस्य विधीयते।
राजन्यवन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः’॥[१४]

आधुनिकयुगेऽयं संस्कारः नानुष्ठीयते।

**विवाहः**

विवाहसंस्कारः सर्वेषु संस्कारेषु उत्कृष्टः। अनेन संस्कारेण सृष्टिः चाचल्यमाना वर्तते। विवाहसंस्कारः हिन्दुसमाजस्य महत्त्वपूर्णसंस्कारः भवति। शास्त्रकाराः अष्टविधविवाहान् वर्णयन्ति-

‘ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः।
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः’॥[१५]

अनेन संस्कारेण मनुष्याः गृहस्थाश्रमं प्रविशन्ति। अद्यतनसमये विवाहसंस्कारस्य श्रेष्ठता वैदिककालात् वरीवर्त्ति। आधुनिकयुगे सर्वेषु संस्कारेषु विवाहसंस्कारस्य प्राधान्यं दरीदृश्यते।

**अन्त्येष्टिसंस्कारः**

मनुष्यजीवनस्य सर्वान्तिमसंस्कारो भवति अन्त्येष्टिसंस्कारः। जीवनस्य समाप्तिर्नाम मृत्युः। ब्यक्तेः जीवनकाले वहुविधकर्मेण तथा नियमरक्षणेन जीवनं संस्कृतं भवति। मृत्योर्पश्चातऽपि अयं संस्कारः महत्त्वपूर्णः मन्यते। मृतव्यक्तेः परिवारजनाः शोकेन म्रियमाणो भूत्वाऽपि लौकिकाचारं पालनं कुर्वन्ति यथाविधि च अन्त्येष्टिसंस्कारं सम्पादयन्ति।

**उपसंहृति :**

आत्मशरीरान्तरनिष्ठो विहितक्रियाजन्योऽतिशयविशेषः संस्कारः। स च द्विविधः। एकस्तावत्कर्मान्तराधिकारेऽनुकूलः यथा उपनयनजन्यो वेदाध्ययनादि अधिकारापादकः। अपरस्तु उत्पन्नदुरितमात्रनाशको यथा बीजगर्भसमुद्भवैनोनिर्बहणो जातकर्मादिजन्य:। कस्यापि जनस्य सम्पूर्णं जीवनमुपर्युक्तेन् कर्मणा फलान्वितं भवति। कर्मणां सम्पादनं तु तदाभविष्यति

यदा तस्मिन् कर्मण्यधिकारो भविष्यति। अनधिकारेण कृतं कर्म निष्फलात्माकं सञ्जायते। यथोपनयनानन्तरं वेदाध्ययनं क्रियते। उपनयनसंस्काररहितानां जनानाम् वेदाध्ययने अधिकारः नास्ति। अर्थात् वेदाध्ययनादि कर्मणां सम्पादने आदौ उपनयनसंस्कारः कर्त्तव्यः। तदभावे कृतस्य सम्बन्धितकर्मणः फलं न प्राप्तुं शक्यते। अत्रैवमपि वक्तुं शक्यते यत् कस्यापि कर्मणां सम्पादने यथागुणमपेक्षते तथागुणं संस्कारेण प्राप्यते। किन्तु आधुनिकयुगे सामाजिकधार्मिककार्यस्य दीर्घताजटिलताकारणाच्च संस्कारेतिहासे ह्रासः परिलक्ष्यते।

**उल्लेखसूची**

१. *शवर*, जैमिनि, ३.१.३

२. शंकरभाष्य, *वेदान्तसूत्र*, १.१.४

३. *मनु*, २.२८

४. *मनु*, ३.४८

५. *पारस्करगृह्यसूत्र*, १.१४.२

६. *पारस्करगृह्यसूत्र*, १.१५.३

७. *पारस्करगृह्यसूत्र*, १.१६.३

८. *पारस्करगृह्यसूत्र*, १.१७.१

९. *पारस्करगृह्यसूत्र*, १.१७.४

१०. *मनु*, २.३४

११. *मनु*, २.३५

१२. *मनु*, २.३६

१३. *मनु*, २.३७

१४. *मनु*, २.६५

१५. *मनु*, ३.२१

**सहायकग्रन्थानां सूची**

१. मनु, *मनुसंहिता*, सम्पा. पण्डित श्री हरगोविन्द शास्त्री, बनारस; चौखम्बा संस्कृत सिरिज अफिस; २०१०

२. पारस्कर, *पारस्करगृह्यसूत्रम्*, सम्पा. महादेव गंगाधर वाक्रे, दिल्लि; मुन्सिराम मनोहरलाल पावलिशार्स प्राइभेट लिमिटेड; १९८२

३. त्रिपाठी, राधावल्लभः, *संस्कार-भास्करः,* सम्पा. ड. रामराज उपाध्यायः, निउ दिल्लि; श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्; १९९४

४. श्रीनीलकण्ठभट्टः, *संस्कार-मयूखः*, सम्पा. पण्डित नरहरिशास्त्री शेंडे, वाराणसी; चौखम्बा कृष्णदास अकादमी; २००६

५. मण्डल, देवदास, *भारतीय सामाजिक प्रतिष्ठान ओ राजनीति*, कलकाता; पश्चिमवंग राज्य पुस्तक पर्षद; २०१९